# श्रीसोमनाथसंस्कृतयुनिवर्सिटी,वेरावलम्
# सत्रान्तपरीक्षा – एप्रिल – २०१९

**कक्षा –** शास्त्रितृतीयवर्षम् (SEM-6) **प्रश्नपत्रम् –** ०८ **गुणाः -** ७०

**विषयः** - साहित्यम् **( C.**E. 3.6.12 ) **समयः -** ११ तः ०२

**दिनाङ्कः** - ०८/०४/२०१९ **सन्दर्भग्रन्थः –** किरातार्जुनीयम् (सर्गः १)

---

### प्रथमान्वितिः (Unit-1)

**प्रश्नः – १** निम्नेषु द्वयो: ससन्दर्भं व्याख्या कार्या । १०

१ स किंसखा साधु न शास्ति योऽधिपं हितान्न य: संश्रणुते स किंप्रभु: ।
सदाऽनुकूलेषु हि कुर्वते रतिं नृपेष्वमात्येषु च सर्वसम्पद: ॥

२ तथापि जिह्म: स भवज्जिगीषया तनोति शुभ्रं गुणसम्पदा यश: ।
समुन्नयन्भूतिमनार्यसङ्गमाद्वरं विरोधोऽपि समं महात्मभि: ॥

३ निरत्ययं साम न दानवर्जितं न भूरि दानं विरहय्य सत्क्रियाम् ।
प्रवर्तते तस्य विशेषशालिनी गुणानुरोधेन विना न सत्क्रियाम् ॥

प्रश्नः – २ किरातार्जुनीयस्य प्रथमसर्गस्य सारांशो लेख्य: । १०

अथवा

महाकवे: भारवे: जीवनकवनपरिचयं लिखत ।

### द्वितीयान्वितिः (Unit-2)

**प्रश्नः – ३ निम्नेषु द्वयो: ससन्दर्भं व्याख्यां लिखत ।** १०

(१)वसूनि वाञ्छन्न वशी न मन्युना स्वधर्म इत्येव निवृत्तकारण: ।
गुरुपदिष्टेन रिपौ सुतेऽपि वा निहन्ति दण्डेन स धर्मविप्लवम् ॥

(२)सुखेन लभ्या दधत: कृषीवलैरकृष्टपच्या इव सस्यसम्पद: ।
वितन्वति क्षेममदेवमातृकाश्चिराय तस्मिन्कुरवश्चकासति ॥

(३) प्रलीनभूपालमपि स्थिरायति प्रशासदावारिधि मण्डलं भुव: ।
स चिन्तयत्येव भियस्त्वदेष्यतीरहो दुरन्ता बलवद्विरोधिता ॥

प्रश्नः – ४ द्रौपद्या: युधिष्ठिरं प्रति कथनं ग्रन्थोक्तपद्धत्या वर्णयत । १०

अथवा

किरातार्जुनीयस्य महाकाव्यत्वं प्रतिपादनीयम् ।

## तृतीयान्विति:(Unit - 3)

**प्रश्नः –५ निम्नलिखितेभ्य: श्लोकेभ्य: द्वयो: ससन्दर्भप्रसङ्गानुसारं व्याख्या कार्या।** १०

१) अखण्डमाखण्डलतुल्यधामभिश्चिरं धृता भूपतिभि: स्ववंशजै:।
त्वयात्महस्तेन मही मदच्युता मतङ्गजेन स्त्रगिवापवर्जिता॥

२) परिभ्रमंल्लोहितचन्दनोचित: पदातिरन्तर्गिरिरेणुरूषित:।
महारथ: सत्यधनस्य मानसं दुनोति नो कच्चिदयं वृकोदर:॥

३) विहाय शान्तिं नृप धाम तत्पुन: प्रसीद सन्धेहि वधाय विद्विषाम्।
व्रजन्ति शत्रूनवधूय नि:स्पृहा: शमेन सिद्धिं मुनयो नभूभृत:॥

प्रश्नः –६ "भारवे: अर्थ गौरवं" लिखत। १०

अथवा

राजनीतौ नृपस्य कृते के गुणा: भारविद्वारा निबद्धा: तद् सरलसंस्कृतेन लिखत।

## अन्वितय: १ – ३ (Units 1 – 3)

**प्रश्नः –७ अधोलिखितेषु प्रश्नेषु दशानां प्रश्नानां लघूत्तराणि लिखत।** १०

१) किरातार्जुनीयं काव्यं महाकाव्यं वा खण्डकाव्यम् ?

२) किरातार्जुनीयस्य प्रणेता कर्ता वा कोऽस्ति ?

३) महाकवि: भारवि: कस्य सम्प्रदायस्यासीत् ?

४) किरातार्जुनीयमहाकाव्ये कति सर्गा: सन्ति ?

५) वर्णलिङ्गी वनेचर: कुत्र ययौ ?

६) किरातार्जुनीये प्रधाननायिका का वर्तते ?

७) गुणानुरोधेन विना का न भवति ?

८) नयेन पौरुषं केन वितन्यते ?

९) कस्य सम्पद: अनारतं फलन्ति ?

१०) केषां जनानां पराभवोऽपि उत्सव एव भवति ?

११) शमेनसिद्धिं क: व्रजति कश्च न व्रजति ?

१२) विजयार्थिन: राजान: किं कुर्वन्ति ?

१३) किरातार्जुनीयस्य प्रथमसर्गे कति श्लोका: सन्ति ?

१४) हितं मनोहारि च दुर्लभं वच: इत्यस्य अर्थं लिखत।

१५) किरातार्जुनीयमहाकाव्ये क: प्रधानरसोऽस्ति ?

*****************